# Atmanathavedapada Stuti Brahmakrita

# આત્મનાથવેદપાદસ્તુતિઃ બ્રહ્મકૃતા

## Document Information

Text title : Atmanathavedapada Stuti

File name : AtmanAthavedapAdastutiH.itx

Category : shiva, stuti

Location : doc_shiva

Proofread by : Aruna Narayanan

Description/comments : From Atmanatha Stuti Manjari, Ed. S. V. Radhakrishna Sastri

Latest update : December 12, 2022

Send corrections to : Sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

December 22, 2022

*sanskritdocuments.org*

# આત્મનાથવેદપાદસ્તુતિઃ બ્રહ્મકૃતા

નિત્યાય નિર્વિકલ્પાય નિર્મલાય મહૌજસે ।
નિરાકારાય ગુરવે જગતાં ગુરવે નમઃ ॥ ૧॥

નાદાય બિન્દુરૂપાય કલાકારાય તેજસે ।
સહસ્રભુજપાદાય સહસ્રાક્ષાય તે નમઃ ॥ ૨॥

ચિદાનન્દાય શુદ્ધાય મહાનન્દસ્વરૂપિણે ।
મહાદેવાદિદેવાય પશૂનાં પતયે નમઃ ॥ ૩॥

અણોરણીયસે તુભ્યં મહતશ્ચ મહીયસે ।
પરાત્પરાય પુણ્યાય ક્ષેત્રાણાં પતયે નમઃ ॥ ૪॥

વેદાગમવિચિન્ત્યાય વેધસેઽજિનવાસસે ।
બહિર્મુખૈરદૃશ્યાય દિશાઞ્ચ પતયે નમઃ ॥ ૫॥

સ્વેચ્છાસૃષ્ટાખિલાણ્ડાય કારણત્રયહેતવે ।
ભક્તચિત્તનિવાસાય સેનાનાં પતયે નમઃ ॥ ૬॥

ચન્દ્રખણ્ડાવતંસાય ચરાચરમયાય તે ।
શાશ્વતાયાદિદેવાય વૃક્ષાણાં પતયે નમઃ ॥ ૭॥

ત્વદાધારમિદં સર્વં ત્વદન્તસ્સમુપસ્થિતમ્ ।
ત્વમાત્મનાથસ્સર્વેષાં પુષ્ટાનાં પતયે નમઃ ॥ ૮॥

જગન્માત્રે જગદ્ધાત્રે જગદ્ધર્ત્રે સુતેજસે ।
મત્પિત્રે જગતાં ભર્ત્રે હ્યન્નાનાં પતયે નમઃ ॥ ૯॥

શરણં ભવ સર્વેશ ત્વમેવ શરણં મમ ।
પાહિ માં પાહિ માં નિત્યં પાહિ મામાત્મનાયક ! ॥ ૧૦॥

ઇતિ આત્મનાથવેદપાદસ્તુતિઃ સમાપ્તા ।

Proofread by Aruna Narayanan

*Atmanathavedapada Stuti Brahmakrita*

pdf was typeset on December 22, 2022

Please send corrections to *sanskrit@cheerful.com*